# समासा: ।

**समासा:**

- **द्वन्द्व:**
  - इतरेतरद्वन्द्व:
  - समाहारद्वन्द्व:
- **तत्पुरुष:**
  - विभक्ति-तत्पुरुष:
    - उपपद-तत्पुरुष:
    - नञ्-तत्पुरुष:
  - कर्मधारय:
    - विशेषण-विशेष्य-सम्बन्ध:
    - विशेषनाम-सामान्यनाम-सम्बन्ध:
    - उपमान-उपमेय-सम्बन्ध:
- **बहुव्रीहि:**
- **अव्ययीभाव:**

द्वन्द्व: तथा च विभक्ति-तत्पुरुष: इति प्रकारद्वयम् अस्माभि: गतवर्षे पठितम् । अधुना समासानाम् अन्यप्रकारान् जानीम: ।

## पुन:स्मारणम्

**१. समासविग्रहं कुरुत ।**



धनधान्यानि । ______



मृगशृगालौ । ______



शुकसारिका: । ______



हस्तपादम् । ______



सस्यपूर्णम् । ______



जलव्यवस्थापनम् ______



अश्मखण्ड: । ______



नीतिनिपुण: । ______

## २. उदाहरणैः रेखाचित्रं पूरयत ।

अ)




आ)




इ)




## ३. षष्ठीतत्पुरुषसमासस्य समस्तपदम् अन्विष्य तत्परितः वर्तुलम् आलिखत ।

| | | | | | | |
|---|---|---|---|---|---|---|
| भ्र | म | ण | स | म | यः | म् |
| ज | नः | रा | ज | ध | र्मः | ऋ |
| ल | ट्ट | चः | पु | नि | रा | ज्ञः |
| व्य | वः | हा | स्त | कः | प | स्था |
| व | नि | क्षे | क | हो | क्रि | या |
| स्था | तो | त्र | प | अ | या | स |
| प | ञ् | प | ठ | सा | सि | म् |
| न | ऋ | तिः | न | म् | द्धिः | म् |
| म् | भ्र | म् | म् | स | म् | र्मः |

१. क्षेत्रस्य पतिः ।
२. जलस्य व्यवस्थापनम् ।
३. राज्ञः धर्मः ।
४. पुस्तकस्य पठनम् ।
५. भ्रमणस्य समयः ।
६. क्रियायाः सिद्धिः ।

## ४. तालिकां पूरयत ।

| समस्तपदम् | विग्रहवाक्यम् | समासनाम |
|---|---|---|
| चिन्ताकुलः | ——— | तृतीया-तत्पुरुषः । |
| प्रजाहितदक्षः | प्रजाहिते दक्षः । | ——— |
| ——— | चोरलुण्ठकेभ्यः भयम् । | पञ्चमी-तत्पुरुषः । |
| विदेशगमनम् | ——— | द्वितीया-तत्पुरुषः । |
| ——— | चरणाभ्यां विकलः । | तृतीया-तत्पुरुषः । |
| पुस्तकपठनमग्नः | ——— | सप्तमी-तत्पुरुषः । |
| विद्याविहीनः | ——— | तृतीया-तत्पुरुषः । |
| भुजगयमिताः | भुजगैः यमिताः । | ——— |
| ——— | पूजायै इदम् । | ——— |
| मदान्धः | मदेन अन्धः । | ——— |

## १. तत्पुरुषः समासः ।

### उपपद–तत्पुरुषः ।

१. जलं ददाति
इति **जलदः** ।



२. पादैः पिबति
इति **पादपः** ।



३. पर्वते तिष्ठति
इति **पर्वतस्थः** ।



४. कुम्भं करोति
इति **कुम्भकारः** ।



**अवधेयम् – उपपद–तत्पुरुषः**

* **उत्तरपदे धातोः अंशः दृश्यते ।**
* **विग्रहे तस्य धातोः लट्लकारस्य प्रथमपुरुषस्य योग्यं वचनं योजनीयम् । यथा –**
  शास्त्रज्ञः – शास्त्रं जानाति इति ।
* **तथा च अर्थदृष्ट्या पूर्वपदस्य योग्या विभक्तिः योजनीया । यथा –**
  पङ्कजम् – पङ्के जायते इति ।

**उदाहरणानि –** वरदा – वरं ददाति इति । गृहस्थाः – गृहे तिष्ठन्ति इति । मधुपः – मधु पिबति इति ।
विद्यार्थी – विद्याम् अर्थयते इति । जटाधारी – जटाः धारयति इति ।

### नञ्–तत्पुरुषः ।



योग्यम्



न योग्यम् – **अयोग्यम्** ।



अल्पम्



न अल्पम् – **अनल्पम्** ।

**अवधेयम् – नञ्–तत्पुरुषः**

* **प्रथमपदम् 'अ/अन्' इति नकारं दर्शयति ।**
* **विग्रहे 'अ'/अन् स्थाने 'न' इति प्रयोजनीयः ।**

**उदाहरणानि –** अनिच्छा – न इच्छा । अशक्यम् – न शक्यम् ।
अनावश्यकम् – न आवश्यकम् । असत्यम् – न सत्यम् ।

# कर्मधारयः ।

## ❋ विशेषण–विशेष्य–सम्बन्धः ।



रक्तं पुष्पम् ।
**रक्तपुष्पम् ।**



हरिताः शुकाः ।
**हरितशुकाः** ।



स्थूलः पुरुषः ।
**स्थूलपुरुषः** ।



विविधाः वर्णाः ।
**विविधवर्णाः** ।



दीर्घा यष्टिका ।
**दीर्घयष्टिका** ।



उन्नताः वृक्षाः ।
**उन्नतवृक्षाः** ।

## ❋ विशेषनाम–सामान्यनाम–सम्बन्धः ।



विवेकानन्दः नाम महोदयः।
**विवेकानन्दमहोदयः** ।



गङ्गा नाम नदी ।
**गङ्गानदी** ।




भारतः नाम देशः ।
**भारतदेशः** ।



सरस्वती नाम देवी ।
**सरस्वतीदेवी** ।



भास्करः नाम आचार्यः ।
**भास्कराचार्यः** ।




शेगाव इति स्थानकम्
**शेगावस्थानकम्** ।

## ✻ उपमान–उपमेय–सम्बन्धः ।

अ) कर्पूरः इव गौरः =   

कर्पूरः (उपमानम्) इव गौरः (साधर्म्यम्) = **कर्पूरगौरः** (महादेवः–उपमेयम्)

घनः इव श्यामः =   

घनः(उपमानम्) इव श्यामः (साधर्म्यम्) = **घनश्यामः**(श्रीकृष्णः–उपमेयम्)

आ) **पादपङ्कजम्** =  

पादौ (उपमेयम्) पङ्कजम् (उपमानम्) इव ।

**मुखकमलम्** =  

मुखम्(उपमेयम्) कमलम् (उपमानम्) इव।

इ) **विद्याधनम्** =  

विद्या(उपमेयम्) एव धनम् (उपमानम्) ।

**गृहमन्दिरम्** =  

गृहम् (उपमेयम्) एव मन्दिरम् (उपमानम्) ।

### अवधेयम् –

**कर्मधारयः**

**✻ समस्तपदानां विग्रहे पूर्वपदम् उत्तरपदं च प्रथमान्तम् ।**

**✻ पूर्वपदं विशेषणं चेत् तद् विशेष्यस्य लिङ्गं, वचनं, विभक्तिम् अनुसरति ।**

**उदाहरणानि –**

अ) प्रियभाषा – प्रिया भाषा ।
सर्वप्रदेशाः – सर्वे प्रदेशाः ।
बहुजनाः – बहवः जनाः ।

आ) कमलकोमलः – कमलम् इव कोमलः ।
सूक्तिसुधा – सूक्तिः सुधा इव ।

इ) मनोमन्दिरम् – मनः एव मन्दिरम् ।
संसारसागरः – संसारः एव सागरः ।

## २. बहुव्रीहिः समासः ।



वाहनं हि ते भवति मूषको **मूषकवाहन** नमोऽस्तु ते ।
कर्णौ तव रे शूर्पाकारौ **शूर्पकर्ण** हे नमोऽस्तुते ।।
आननं हि ते गजस्यैव हे देव **गजानन** नमोऽस्तु ते ।
कायस्तव रे महामहीयान् **महाकाय** हे नमोऽस्तु ते ।।१।।



चन्द्रस्ते शोभते भाले **भालचन्द्र** नमोऽस्तु ते ।
कण्ठस्ते विद्यते नीलो **नीलकण्ठ** नमोऽस्तु ते ।।३।।



गदा ते विद्यते हस्ते **गदाहस्त** नमोऽस्तु ते ।
बलं ते हि महद् देव **महाबल** नमोऽस्तु ते ।।४।।

**अवधेयम् –**

**बहुव्रीहिः –** ✻ अन्यपदार्थप्रधानः ।
✻ नित्यं विशेषणं दर्शयति ।
✻ विग्रहे 'यद्' इत्यस्य उपयोगः सम्बन्धदर्शनाय भवति ।
✻ विग्रहे 'तद्' इत्यस्य उपयोगः अन्यपदं सूचयति ।

✻ **बहुव्रीहिः – उदाहरणानि**

**मूषकः वाहनं** यस्य सः मूषकवाहनः ।
**श्वेतम् अम्बरं** यस्याः सा श्वेताम्बरा ।
**शुभ्रं वस्त्रं** यस्याः सा शुभ्रवस्त्रा ।
**पीतम् अम्बरं** यस्य सः पीताम्बरः ।
**शूर्पौ इव कर्णौ** यस्य सः शूर्पकर्णः ।

✻ **बहुव्रीहिः – उदाहरणानि**

**शशी शेखरे** यस्य सः शशिशेखरः ।
**चक्रं पाणौ** यस्य सः चक्रपाणिः ।
**शङ्खः हस्ते** यस्य सः शङ्खहस्तः ।
**भुजगे शयनं** यस्य सः भुजगशयनः ।

**समासविग्रहे क्वचित् पूर्वपदं उत्तरपदं च समानविभक्तौ भवतः क्वचित् न इत्यपि अवधेयम् ।**

कृतिः – समस्तपदान् अन्विष्य वर्तुलम् आलिखत ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| भा | ल | च | न्द्रः | वि | र | ई | अ |
| सु | ह | दः | वि | म | लः | श्व | जा |
| क्षु | द्र | बु | द्धिः | ला | ए | र | त |
| ल | ब्ध | शि | क्षः | म्बु | क | नि | श |
| ग | जा | न | नः | यः | द | ष्ठः | त्रुः |
| वि | शा | ल | बा | हुः | न्तः | न् | स |
| प | द्म | ह | स्ता | म | हो | द | यः |

१) क्षुद्रा बुद्धिः यस्य सः ।
२) विशालौ बाहू यस्य सः ।
३) एकः दन्तः यस्य सः ।
४) लब्धा शिक्षा येन सः ।
५) ईश्वरे निष्ठा यस्य सः ।
६) भाले चन्द्रः यस्य सः ।
७) पद्मं हस्ते यस्याः सा ।
८) गजस्य आननम् एव आननं यस्य सः ।
९) विमलम् अम्बु यस्मिन् तत् ।
१०) महान् उदयः यस्य सः ।

## ३. अव्ययीभावः समासः ।

* प्रथमं पदं तथा सम्पूर्णं समस्तपदम् अव्ययं भवति अतः अव्ययीभावः इति उच्यते ।
* विग्रहः तु अव्ययस्य अर्थानुसारम् ।
* नित्यं नपुंसकलिङ्गम् एकवचनं वर्तते ।
* नित्यं वाक्ये क्रियाविशेषणरूपेण प्रयुज्यते ।

उदाहरणानि –

१) श्यामः दिने दिने पाठशालां गच्छति ।
श्यामः **प्रतिदिनं** पाठशालां गच्छति ।

२) भारतस्य गृहे गृहे संस्कृतं भवतु ।
भारतस्य **प्रतिगृहं** संस्कृतं भवतु ।

३) माता अहनि अहनि देवपूजां करोति ।
माता **प्रत्यहं** देवपूजां करोति ।

४) भास्करः इच्छाम् अनुसृत्य भोजनं करोति ।
भास्करः **यथेच्छं** भोजनं करोति ।

५) रघुः शक्तिम् अनुसृत्य दानं करोति ।
रघुः **यथाशक्ति** दानं करोति ।

६) छात्राः क्रमम् अनुसृत्य वर्गं प्रविशन्ति ।
छात्राः **यथाक्रमं** वर्गं प्रविशन्ति ।

**सकोपम्, सवेगम्, सानन्दम् इत्यपि अव्ययीभाव–समासस्य एव उदाहरणानि –**

१) माता बालकं स्नेहेन सह भोजयति ।
माता बालकं **सस्नेहं** भोजयति ।

२) भक्तः श्रद्धया सह देवं पूजयति ।
भक्तः **सश्रद्धं** देवं पूजयति ।

३) वर्षाकाले मयूराः आनन्देन सह नृत्यन्ति ।
वर्षाकाले मयूराः **सानन्दं** नृत्यन्ति ।

४) छात्राः उत्साहेन सह संस्कृतं पठन्ति ।
छात्राः **सोत्साहं** संस्कृतं पठन्ति ।